National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(25): 140- 142
© 2019 NJHSR
www.sanskritarticle.com

**डॉ. सत्यनारायण आचार्यः**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः),
तिरुपतिः, (आन्ध्रप्रदेशः)

**Correspondence:**
**डॉ. सत्यनारायण आचार्यः**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः),
तिरुपतिः, (आन्ध्रप्रदेशः)

# श्रीनिधिस्वामिनां कवितासु भगवद्भक्तिरसः

**डॉ. सत्यनारायण आचार्यः**

**श्रीनिधिस्वामिनां परिचयः -**

समकालिकसंस्कृतकविषु लब्धप्रतिष्ठाः विद्वांसः श्रीमन्तः निधिस्वामिनः (१९१३ - २००१) स्वजीवनावधौ २०,०००परिमितानां संस्कृतपद्यानां रचयितारः आसन्। गजेन्द्रमोक्षणमधिकृत्य कुञ्जररञ्जनमिति शीर्षकान्वितं चतुःसहस्रसङ्ख्यापरिमितं श्लोकात्मकं काव्यं व्यरचयन्। इमे विल्लूरु आशुकविसार्वभौमः इति बिरुदभाजः १९८६ संवत्सरे राष्ट्रपतिसम्मानेन सम्मानितः। एते बाल्यकाले एव सप्तवर्षवयसि श्लोकरचनासामर्थ्यमिर्जतवन्तः। तदीयरचनासु भारतवर्षस्य प्राचीनदेवालयानां, देवालयसंस्कृतेश्च संरक्षणार्थं विविधदेवानां स्तोत्राणि लिखितवन्तः। तेषु बालाजीविंशतिः, मङ्गलस्तवः, श्रीमणिमङ्गलस्तवः, वडुवूर्विंशतिः, अपर्याप्तांमृतविंशतिः, विवाहवरदस्तवः, तटाकपालकस्तवः, पादस्तुतिः,श्रीपुरुषोत्तमषोडशी, श्रीचिलुकूरुस्तुतिप्रभृतीनि च भक्तहृदयमान्दोलयन्ति। शोधपत्रेऽस्मिन् श्रीनिधिस्वामिनां कवितासु भगवद्भक्तिरसः इति विषये किञ्चिदालोच्यते।

**भक्तिशब्दव्युत्पत्तिः -**

भारतवर्षस्य भक्तिसाहित्यमतिविपुलमस्ति। वैदिककालात् भक्तिशब्दस्य प्रयोगः संस्कृतसाहित्ये समुपलभ्यते। तत्र भज सेवायां अत्यस्माद्धातोः क्तिन् प्रत्यये भज्यते सेव्यते इति भक्तिः इति व्युत्पत्या भक्तिः सेवार्थं बोधयति। महर्षिः शाण्डिल्यः भक्तेः परिभाषामित्थं विवृणोति - सा परानुरक्तिमीश्वरे इति। एवं च नारदभक्तिसूत्रे उल्लिखितं - सात्त्वस्मिन् परमप्रेमरूपा इति। विष्णुपुराणेऽपि कथ्यते -

**या प्रीतिरविवेकानां विषयेष्वनुपायिनी।**
**त्वामनुस्मरतः सा ये हृदयान्मापसर्पतु।।** (वि.पु.१.२०.१९)

आचार्यरामानुजानुसारं - स्नेहपूर्वमनुध्यानं भक्तिरुच्यते बुधैः इति ।
रूपगोस्वामी भक्तिरसामृतसिन्धौ उल्लिखति -

**अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा।।** (भ.र.सि.१.१.११)

उपनिषत्सु श्वेताश्वतरोपनिषदि भक्तिशब्दस्य प्रयोगः देवभक्तौ, गुरुभक्तौ च बुध्यते। तदुक्तं

**यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः।।** (श्वेताश्वतर.६.२३)

मधुसूदनसरस्वतीमहाभागेन भक्तेः परिभाषा इत्थं कृता -

**द्रुतस्य भगवद्धर्माधारावाहिकतां गता।**
**सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते।।**

रामायणेऽपि वनगमनसमये श्रीरामं प्रति लक्ष्मणस्य भक्तिः वर्णिता यथा -

**एवम् मयि च तु भक्तिर्भविष्यति सुदर्शिता।** (रामायण.२.१३.१६)

महाभारते भक्तेः महती पराकाष्ठा दृश्यते। तत्र शान्तिपर्वणि नारायणीयोपाख्याने भक्तेः स्पष्टा व्याख्या समुपलभ्यते। एवञ्च श्रीमद्गीतायामपि चतुर्दशवारं भक्तिशब्दस्य प्रयोगः कृतः। तत्र द्वादशोऽध्यायः भक्तियोगमेव प्रतिपादयति। भागवतपुराणेऽपि भक्तिः सविस्तरं वर्ण्यते। तत्र भारतीयदर्शनशास्त्रे भगवान् श्रीशङ्कराचार्यः जीवब्रह्मणोः ऐक्यं स्वीकृत्य अद्वैतवादस्य प्रचारं चकार। एतद्विपरीततया श्रीरामानुजाचार्यः जीवस्य ब्रह्मणश्च पृथक् सत्तां प्रतिपाद्य उभयोः बिम्बप्रतिबिम्बभावं स्वीचकार। अनेन श्रीसम्प्रदायस्य नाम विशिष्टाद्वैततत्त्वस्य विकासः भारतीय-वैष्णवधर्मपरम्परायां नवचैतन्यं प्रत्यपादयत्। श्रीरामानुजाचार्यस्य सिद्धान्तानुसारं सगुणः ईश्वरः भक्तानां अनुग्रहार्थं पर - व्यूह - विभव - अन्तर्यामि - अर्चावताराः इति पञ्चरूपाणि धारयति। अनेन सम्प्रदायेन प्रभाविताः श्रीनिधिस्वामिनः भगवद्भाक्तिं निरूपयितुं बहुविधानि स्तोत्राणि रचितवन्तः।

**भगवद्भक्तिरसः -**

काव्यशास्त्रे विविधसम्प्रदायेषु रससम्प्रदायः प्रमुखो भवति। तत्र रससूत्रप्रवर्त्तकः आद्याचार्यः भरतमुनिः भक्तिरसविषये मौनमवलम्बते। अनेन नाट्ये अष्टौ रसाः भवन्तीति प्रतिपादितम्। ततः काव्यप्रकाशादिषु निर्वेदो स्थायीभावोऽस्ति शान्तोऽपि नवमो रसः इति शान्तरसस्य महान् विचारः प्रवर्त्तते। ततः भामहाचार्यः अलङ्कारवादी इत्यतः कृष्णप्रीतिः प्रेयः अलङ्कारः इति सूचितवान्। भक्तिरसस्य सङ्केतः आदौ दण्डिना कृतः। तेनोक्तं - भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः (काव्यादर्श.२.२६)। अनेन ज्ञायते यत् भगवद्विषयिणी प्रीतिरेव भक्तिरिति। ध्वनिकारः आनन्दवर्धनः अलक्ष्यक्रम-व्यङ्ग्यध्वनौ भक्तेः अन्तर्भावमिच्छति। अस्य मते भक्तितुल्यं सुखं जगति किञ्चिदपि नास्ति। तदुक्तं -

**या व्यापारवती रसान् रसयितुं काचित्कवीनां नवा**
**दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषिता च वैपश्चिती।**
**ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं**
**श्रान्ता नैव च लब्धमब्धिशयना त्वद्भक्तितुल्यं सुखम्।।**

(ध्वन्या.३.४३)

काव्यप्रकाशकारः मम्मटाचार्योऽपि देवादिविषया रतिः भावध्वनिकाव्यमिति प्रतिपादितवान्। साहित्यदर्पणकारादयः एतत् समर्थितवन्तः। भक्तिरससन्दर्भे श्रीरूपगोस्वामी विशिष्टं विचारं कृतवान्। तस्य ग्रन्थद्वयं यथा भक्तिरसामृतसिन्धुः, उज्ज्वल-नीलामणिश्च इति भाक्तिं रसरूपेण प्रतिपादयितुमलम्। रूपगोस्वामीमते भक्तिरसस्य स्थायीभावः श्रीकृष्णरतिः। तत्र भक्तस्य ईश्वरस्य च मध्ये सम्बन्धस्य आधारः पञ्चविधो भवति। यथा -

१.शान्तिरतिः - यत्र उभयोः स्वभेदः न वर्त्तते।
२.प्रीतिरतिः - सेवकस्य स्वामिनं प्रति प्रेमभावः।
३.सख्यरतिः - यत्र भक्तः ईश्वरश्च उभौ अपि समानौ।
४.वत्सलरतिः - यत्र भक्तः मतापितरौ तथा ईश्वरः पुत्रत्वेन प्रतीयन्ते।
५.प्रियतारतिः - यत्र भक्तः प्रेमिका ईश्वरश्च प्रेमिरूपेण प्रतीयते।

एते पञ्चविधाः क्रमशः शान्तः, प्रीतिः, प्रेयान्, वत्सलः, मधुररसश्च इति कथ्यन्ते। उज्ज्वलनीलमणिग्रन्थे रूपगोस्वामिना मधुररसः उज्ज्वलरसो वा इति प्रतिपादितः। जीवगोस्वामी, कविकर्णपूरः, बलदेवविद्याभूषणः, नारायणभट्टः, मधुसूदनसरस्वती इति एते सर्वे भक्तेः रसत्वं प्रतिपादयितुं प्रयत्नं कृतवन्तः। तत्र भक्तिरसस्वरूपं रूपगोस्वामिमतानुसारं यथा -

**सामग्रीपरिपोषेण परमा रसरूपता**
**विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।**
**स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः**
**एष कृष्णरतिः स्थायी भावो भक्तिरसो भवेत्।।**

(भ.र.सि.२.१.५-६)

मधुसूदनसरस्वतीमहोदयानुसारं भक्तिरसस्वरूपं यथा -

**विभावैरनुभावैश्च व्यभिचारिभिरप्युत।**
**स्थायीभावः सुखत्वेन व्यज्यमानो रसःस्मृतः।।**

(भ.भ.रस.३.२)

श्रीनिधिस्वामिनां कवितासु भगवद्भक्तिरसः -

वडुवूर्विंशत्यां -

श्रीस्वामिनः नवे वयसि स्वतातपादैः वडुवूर् ग्रामे सम्मापिदितानि गृहक्षेत्रारामादीनि विक्रीय स्वतातपादनिधना-नन्तरं स्वतातपादऋणानां प्रत्यर्पणं कृत्वा वडुवूर्तो गच्छन्तस्तत्र त्रिभङ्गीरीत्य तिष्ठन्तीं श्रीरामस्य मूर्त्तिमासेव्य

**गृहक्षेत्रारामाः जनकचरणस्पर्शशुभगाः**
**त्वया मत्तो नीताः मनुकुलपते ! किं मम ततः?।**
**त्रिभङ्गीसंसेव्यं मधुरमधुरं ते वपुरिदं**
**मदन्तस्संसक्तं न खलु परिहर्त्तु प्रभवसि।।**

**अपर्याप्तामृतविंशतौ -**

इयं स्तुतिः कुम्भघोणक्षेत्रे विराजमानस्य अपर्याप्तामृत इति प्रसिद्धस्य साङ्गपाणेः। अत्रापि विरक्तिपूर्वो भक्तिभावः।

**किं गेहैर्गलितैर्धनैरपि गतैः केदारजालैस्तदा**
**किं वा तैरपि वस्तुभिः प्रियतमैः यातैर्मनोहारिभिः।**
**बन्धुभ्यश्च समागतैः परिभवैः किं वा ममात्रागतम्**
**श्रीमत्कोमलवल्लिकासहचरं श्रीशार्ङिर्गणं पश्यतः।।**

**बालाजिविशत्यां -**

श्रीश्रीनिवासमधिकृत्य कृतायामस्यां

**शेषाहिशैले विहृतिं भजन्तं**
**भाषाधिनाथमुखदैवतपूजिताङ्घ्रिम्।**
**योषाभिरामभुजमध्यमुदारभावं**

**एषा जहाति खलु जातु न मे मनीषा।**

भाषाधिनाथः - बह्मा वाग्देवीपतित्वात्

योषाभिरामभुजमध्यं - योषया रमया अभिरामं भुजयोर्मध्यं अथवा योषाय रमाय अभिरामं भुतयोर्मध्यं यस्य सः श्रीनिवासः।

**मङ्गलस्तवे -**

गुरुवायुपुराधीशविषये अस्मिन् स्तोत्रम्

**गुरुगन्धवाहनगरीविहारिणं**
**कुरुवंशजातविजयस्य सारथिम्।**
**गुरुमागमस्य परमं पुरातनं**
**कुरु मानसान्तरनिशं शुभाश्रयम्।।**

मानस! इति सम्बुद्धिर्मनसस्तुरीये पादे ।

गुरुगन्धवाहनगरी - गुरुवायुपुरी

शुभाश्रय इति पुराणरत्नविष्णुपुराणवर्णितायां भगवतो मूर्त्तौ रूढप्रायश्शब्दः।

**मणिमङ्गलस्तवे -**

गुरुवायुपुराधीशविषये द्वितीये अस्मिन् स्तोत्रे

**धिषणसमीरणपत्तननायक!**
**तावकशोभनपादपयोजम्।**
**मनसि मनागिव कलयितुमीहे**
**तत्कुरु तत् कुरु तदलं तदलम्।।**

धिषणसमीरणपत्तनम् - गुरुवायुपुरम्।

**विवाहवरदस्तवे -**

काञ्चीदेवाधिराजविषये अस्मिन् स्तवे तस्य वीथीभ्रमणा-वसरमधिकृत्य कृते श्लोके

**द्रमिडनिगमगोष्ठ्या स्तूयमानं पुरस्तात्**
**शुभगधवलपीनछत्रयुग्माभिरामम्।**
**अमरफणितिवेदैः पृष्ठतो रक्षमाणं**
**स्मरति मम मनस्तं सर्वदा देवराजम्।।**

**तटाकपालकस्तवे -**

मधुरान्तकं तटाकपालकराममधिकृत्य कृते अस्मिन् स्तवे

**उन्नसं मुखमुदारलोचनं**
**कोमलाननकपोलफालकम्।**
**पालकस्य कमलालयस्य मे**
**मानसे लसतु तेजसां पदम्।।**

तृतीयपादे कमलालयस्य पालकस्य इति व्यधिकरणषष्ठ्यौ।

**पादस्तुतौ -**

भगवतः पादमधिकृत्य कृतायामस्यां

**यत्सन्ताडनचूर्णितश्शकट इत्याख्याधरो दानवः**
**यन्नृत्तं बहुधा ततान नवनीतार्थं जनन्याः पुरः।**
**यत्सञ्चारपवित्रसैकततिर्जाता कलिन्दात्मजा**
**तन्मे नृत्यतु चित्तरङ्गभवने श्रीकृष्णपादाम्बुजम्।।**

श्रीपुरुषोत्तमषोडशिनि -

पूरिजगन्नाथपरेऽस्मिन् स्तोत्रे

**वेलावने पूर्वमहापयोधेः**
**नीलाचले कल्पितसन्निधानम्।**
**तालाङ्कभद्रासहितं हिताय**
**कालाम्बुदाभं शरणं प्रपद्ये।।**

नीलचल इति पुराणेषु प्रथितमिदं क्षेत्रम्। तालाङ्को बलरामः कालाम्बुदः - कालमेघः।।

**उपसंहारः -**

अस्माकं भारतवर्षस्य सामाजिकजीवनधारायां भक्तिरसस्य सर्वथा महत्त्वमनुभूयते। तदर्थं कवयः भक्तिकाव्यरचनायां सर्वथा यत्नवन्तो भवन्ति। तेषु श्रीनिधिस्वामिनां प्रयासः समकालीन-संस्कृतकवितासन्दर्भे भक्तिरसनिरूपणे प्रमुखां भूमिकां निर्वहतीति निश्चप्रचं वक्तुं शक्यते।

**सहायकग्रन्थसूची**

१.श्रीबालाजीविंशतिः,श्रीचिलुकूरुस्तुतिः-श्रीनिधिस्वामी, २०१३

२.मङ्गलस्तवः - श्रीनिधिस्वामी, VASSCC, २०१३

३.भगवद्भक्तिरसायन और भक्तिरस - ज्योत्सना निगम, न्यू भारतीय बुक कार्पोरेषन, दिल्ली, २००५